संस्कृतवार्ता:

26/01/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· राष्ट्रम् अद्य षट्-सप्ततितमं गणतन्त्र-दिवसम् आमानयति। अस्मिन् अवसरे नव-दिल्ल्यां कर्तव्य-पथे राष्ट्रपतिः द्रौपदी मुर्मु: देशस्य नेतृत्वं ध्वजारोहणं च कृतवती।

· इण्डोनेशियायाः राष्ट्रपति: प्रबोवो सुबियांटो इत्यसौ मुख्यातिथित्वेन गणतन्त्रदिवस- समारोहे उपातिष्ठत्।

· गणतन्त्रदिवसस्य पथसञ्चलकार्यक्रमे स्वर्णिमभारत-विरासत और विकास-इत्येतस्मिन् विषये आधारिता: एकत्रिंशदधिकं यावत् सन्निरूपिका: प्रदर्शिता:।

· केन्द्र-प्रशासनेन यूपीएस इति एकीकृत-सेवानिवृत्ति-वृत्ति-योजनाः कार्यान्वयनम् आधिकारिक-रूपेण अधिसूचितम्।

आई. सी. सी. अण्डर्-19 इत्येतस्यां महिला टी-20 विश्व-चषक -प्रतिस्पर्धायाम्  अद्य भारतम् बांग्लादेशदलम् अष्टस्तोभै: पराजित्य उपान्त्यचक्रे प्रविष्टवत्।

<u>गणतन्त्रदिवस समारोह:</u>

राष्ट्रम् अद्य षट्-सप्ततितमं गणतन्त्र-दिवसम् आमानयति। अस्मिन् अवसरे नव-दिल्ल्यां कर्तव्य-पथे राष्ट्रपतिः द्रौपदी मुर्मु: ध्वजारोहणं कृतवती।

जयति जयति भारतम् –

इतः प्राक् प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रिय-समर-स्मारकम् उपेत्य देशाय हुतिङ्गतेभ्यः वीरेभ्यः पुष्पाञ्जलिं समर्पितवान्।

इण्डोनेशियायाः राष्ट्रपति: प्रबोवो सुबियांटो इत्यसौ मुख्यातिथित्वेन समारोहे उपातिष्ठत्।

अद्य आयोजिते प्रयाणे देशस्य सभ्यतां संस्कृतिं वैज्ञानिक-प्रगतिं च आदाय मनोहीरिण्य: सन्निरूपिका: प्रस्तुताः। प्रयाणे त्रिशताधिकैः कलाकारैः देशस्य वाद्ययन्त्राणां ध्वनिषु सारे जहां से

अच्छा इत्येतं गीतं प्रदर्शितम् । समारोहे उदग्रविमानैः ध्वजस्य आकृतौ पुष्पवर्षा कृता। अस्मिन् वर्षे प्रयाणे दशसहस्राधिकाः विशिष्टातिथयः आमन्त्रिताः आसन्। एतेषु सरपंच-हस्तशिल्प-स्व-सहायता- समूहनां सदस्याः आशा- आंगनवाड़ी कार्यकर्तारः राजमार्गनिर्माण-सम्बद्धाः श्रमिकाः च सम्मिलिताः आसन्।

गणतन्त्रदिवसस्य पथसञ्चलकार्यक्रमे स्वर्णिमभारत-विरासत और विकास-इत्येतस्मिन् विषये आधारिता: एकत्रिंशदधिकं यावत् सन्निरूपिका: प्रदर्शिता:। प्रथमवारं कर्तव्यपथे तिसृणां सेनानां सन्निरुपिका: भागम् अग्रह्णन्। हरियाणाया: सन्निरुपिकायां भगवद्गीताया: उत्तरप्रदेशस्य च सन्निरुपिकायां प्रचलयमानस्य महाकुम्भस्य दृश्यानि प्रदर्शितानि। कार्यक्रमस्य समापनं सप्तचत्वारिंशत्-विमानानां नभप्रदर्शन्या सह जातम्।

## राष्ट्रपतिः पद्मसम्मानं

राष्ट्रपतिना द्रौपदी-मुर्मु-वर्यया पञ्चविंशत्युत्तर-द्वि-सहस्र-तम-वर्षाय नवत्रिंशदुत्तरैकशतं जनेभ्यः पद्म-पुरस्कार-प्रदातुं स्वीकृति: प्रदत्ता। अस्यां सूच्यां सप्त-पद्म-विभूषण-पुरस्कारः नवदश-पद्म-भूषण-पुरस्कारः त्रयोदशोत्तरैकशतं च पद्म-श्री पुरस्काराः सम्मिलिताः सन्ति। पुरस्कृतेषु त्रयोविंशतिः महिलाः सन्ति। अवधेयं यत् अस्यां सूच्यां साहित्य-सङ्गीत-कलादि-क्षेत्र-सम्बद्धाः भारतीयाः वैदेशिकाश्च जनाः सम्मिलिताः वर्तन्ते। अत्रावधौ प्रधानमन्त्री नरेन्द्रमोदी सकलेभ्य: पद्मपुरस्कार- प्राप्तविशिष्ट-जनेभ्य: वर्धापनानि अयच्छत्। श्रीमोदिना सामाजिकसन्देशपटले लिखितं यत् भारताय इदं हि गौरवस्य क्षणं विद्यते यत् उत्कृष्टोपलब्धिं समधिगतानाम् जनानां सम्मानम् भवतीति।

## केन्द्रं यूपीएस इति

केन्द्र-प्रशासनेन यूपीएस इति एकीकृत-सेवानिवृत्ति-वृत्ति-योजनाः कार्यान्वयनम् आधिकारिक-रूपेण अधिसूचितम् । प्रशासनेन केन्द्र-सर्वकारस्य कर्मचारिभ्यः राष्ट्रिय-सेवानिवृत्ति-वृत्ति-प्रणाल्याम् एकस्य विकल्पस्य रूपेण विगते-वर्षे अगस्त-मासे एकीकृत-सेवानिवृत्ति-वृत्ति-योजना आरब्धासीत्। इयं योजना अस्मिन् वर्षे अप्रैल-मासस्य प्रथम-दिनात् प्रचलिष्यति।

राष्ट्रपति-गण्तन्त्रदिवस:

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: प्रतिपादितवती यत् एकं राष्ट्रम् एकं निर्वाचनमिति विधेयकं संसदि प्रस्तावितेषु वचनेषु सुशासनस्य नियमान् पुर्नपरिभाषयितुं प्रतिज्ञते इति। असौ कथितवती यत् एकं राष्ट्रम् एकं निर्वाचनमिति विधेयकं शासने निरन्तरताम् इतोऽपि सुदृढीकरिष्यति। अपि च नीतिगत-निष्क्रियतां रोद्धुं संसाधनानां विचलनं न्यूनीकर्तुं वित्तीयभारञ्च अल्पकर्तुं शक्नोतीति।

गणतन्त्रदिवसस्य पूर्वसन्ध्यायां राष्ट्रम् सम्बोधयन्ती राष्ट्रपति: अवोचत् यत् अस्माकं देश: औपनिवेशिक-मानसिकताया: अनेकान् अवशेषान् परिवर्तयितुं कठोरप्रयासान् पश्यतीति यो हि सप्तचत्वरिंशदाधिक-नवदश -शततमवर्षात् भारतीयानां मध्ये विराजमानो विद्यते। अनया अग्रे स्पष्टीकृतं यत् भारतीयदण्ड-संहिता दण्डप्रक्रियासंहिता भारतीय-साक्ष्य अधिनियमानां क्रमश: भारतीय-न्यायसंहिता भारतीयनागरिक सुरक्षा संहिता भारतीय साक्ष्य-अधिनियमेषु परिवर्तनाय कृतनिर्णय: एतादृशेषु प्रयासेषु उल्लेखनीयो विद्यते।

प्रधानमन्त्री-गणतन्त्रदिवस:

प्रधानमन्त्री नरेन्द्रमोदी गणतन्त्रदिवसस्य शुभावसरे देशवासिभ्य: शुभकामना: प्रदतवान्। एकस्मिन् सामाजिकसन्देशपटले श्रीमोदी अलिखत् यत् राष्ट्रमद्य गणतन्त्रस्य पञ्चसप्ततितमं गौरवयुतवर्षम् आमानयति। अस्मिन् शुभावसरे तेभ्य: समेभ्य: विभूतिभ्य: नमनमस्ति यै: संविधानं निर्मीय एतत् सुनिश्चितं कृतं यत् अस्माकं विकासयात्रा लोकतन्त्रे गरिम्णि एकतायाञ्च आधारिता स्यादिति।

आकाशवाणी-गणतन्त्रदिवस:

आकाशवाण्या: महानिदेशिका डॉ. प्रज्ञापालीवाल-गौड़ इत्येषा अद्य गणतन्त्रदिवसावसरे राष्ट्रिय-राजधान्या: आकाशवाणी-भवने राष्ट्रियध्वजारोहणं कृतवती। आकाशवाण्या: परिसरे असौ महात्मागान्धिवर्यस्य प्रतिमायां पुष्पाञ्जलिं समर्पितवती।

राष्ट्रपति: तटरक्षकपदकानि

राष्ट्रपति: द्रौपदीमुर्मु: भारतीय-तटरक्षक-कर्मिभ्य: राष्ट्रपति-तटरक्षक -पदकाय तटरक्षक-पदकाय च स्वीकृतिं प्रदतवती। पुरस्कारोऽयं तेषाम् अद्वितीय-वीरता: कर्तव्यानि च प्रति उत्कृष्ट -समर्पणस्य विशिष्टसेवानां कार्येभ्य: मान्यतां प्रददाति।

## गणतन्त्रदिवस- शौर्यपदकानि

षड्सप्ततितमस्य गणतन्त्रदिवसस्य पूर्वसन्ध्यायाम् राष्ट्रपति: द्रौपदी-मुर्मु: वीरतापुरस्कारेभ्य: स्वीकृति: प्रदत्ता। आरक्षि-अग्निशमन-गृहरक्षक-नागरिकसुरक्षासेवानां द्विचत्वारिंशदधिक-नवशत-संख्यकेभ्य: कर्मिभ्य: वीरतापुरस्कारं सेवा-सम्मानं प्रदास्यति। एतेषु पुरस्कृतेषु पञ्चनवतिः कर्मचारिणः शौर्यस्य कृते चयनिताः सन्ति। ततः परम् एकोत्तरैकशतं विशिष्टकर्मचारिणः विशिष्टसेवायाः कृते राष्ट्रपतिपदकेन, षड्चत्वारिंशदधिक-सप्तशतं-यावत् कर्मचारिणः उत्कृष्टसेवायै पुरस्कृताः भविष्यन्ति।

## धावन-क्रीडा

एथलेटिक्स-क्रीडासु भारतस्य ज्योति याराजी इत्यनया गतदिने फ्रांस-देशे ऐषमः मीटिंग डे नैनटेस मेट्रोपोल इति प्रतियोगितायां महिलानां षष्टिः मीटर-बाधा-धावन् स्पर्धायां स्वर्ण-पदकं विजितम्। जीता। शत-मीटर-बाधा-धावन-स्पर्धायां राष्ट्रिय-पदक-विजेत्र्या ज्योतिना पियरे-क्विनोन मेट्रोपॉलिटन इति क्रीडाङ्गणे चतुरधिक-दशमलव-अष्ट पल-मिते समये एव स्पर्धा विजिता।

## क्रिकेट

आई. सी. सी. अण्डर्-19 इत्येतस्यां महिला टी-20 विश्व-च ष क प्रतिस्पर्धायाम् अद्य क्वालांलपुर-नगरस्य बायूमास् ओवल्-क्रीडाङ्गणे बाङ्ग्लादेश्-देशस्य उपरि अष्ट-स्तोभ-विजयेन भारतम् उपान्त्यचक्रे प्रवेशम् अकरोत्।

।। इति वार्ता:।।